**ध्राचा** स्त्री ध्राङ्क भावे अङ् यवादिगणस्थत्वे ध्राचेति निर्देशात् उपधालोपः। १गतौ ततोऽस्त्यर्थे मतुप् यवा० न मस्य वः। ध्राचामत् गतियुक्ते त्रि० स्त्रियां ङीप्

**ध्राख** शोधने अलमर्थे च भ्वा० पर० सक० सेट्। ध्राखति अध्राखीत् दध्राख। ऋदित् चङि अदध्राखत् त। अलमर्थः पर्याप्तिस्तेत् तत्र अक०।

**ध्राघ** शक्तौ भ्वा० आत्म० अक० सेट्। ध्राघते अध्राघिष्ट। दध्राघे। ऋदित् चङि अदध्राघत् त।

**ध्राजि** त्रि० ध्रज–गतौ वा० भावे इण्। गतौ “ध्राजिरेकस्य ददृशे न रूपम्” ऋ० १।१६४।४४ “ध्राजिर्गतिः” भा० णिच् कर्त्तरि इन्। १ष्टणादेर्वक्रगतिकारके २वातभेदे (घुरणा वाताम) उणादिकोषः।

**ध्राड** विभेदे भ्वा० आत्म० सक० सेट्। ध्राडते अध्राडिष्ट। दध्राडे। ऋदित् चङि अदध्राडत् त।

**ध्राडि** पु० ध्राड–इन्। पुष्पचये उणादिकोषः।

**ध्रिज** गतौ भ्वा० पर० सक० सेट्। ध्रेजति अध्रेजीत् दिध्रेज

**ध्रु** स्थैर्ये अक० सर्पणे सक० तु० कु० पर० अनिट्। ध्रुवति अध्रुवीत् दुध्राव। अयं जीव् ध्रुतो वर्त्तते। “बुद्धिपूर्वं ध्रुवन्न त्वा राजहत्वा पिता खलम्” भट्टिः गतौ “ततोद्गदया वारिं तं दुध्रावाद्रिणा कपिः” भट्टिः “न स स्वो दक्षो वरुण! ध्रुतिः” ऋ० ७।८६।६ “ध्रुतिः दैवगतिः” भा०

**ध्रु** गतौ भ्वा० प० अनिट् नित्यरुः। ध्रवति अध्रौषीत् दुध्राव।

**ध्रुव** त्रि० कु० ध्रु–अच्। १स्थिरे २निश्चिते हेमच० ३सन्तते ४शाश्वते ५तर्के न० मेदि०। ६गगने न० हेम०। ७शङ्कौ ८विष्णौ ९हरे १०वटे ११उत्तानपादनृपसुतभेदे पु० मेदि० १२वसुभेदे विष्णुपुराणादिषु १३द्वादशे योगे पु० मेदि०। १४स्थाणौ पु० अमरः १५शरारिखगे पुंस्त्री० त्रिका०। १६ध्रुवके (धुया) ख्याते पदार्थे पु० संगीतदा०। १७आकाशस्थिते ताराद्वये च पु०। ते च सर्वेषां नक्षत्रादीनामाधारभूते उत्तरदक्षिणयोः स्थिते सू० सि० उक्ते यथा “मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते। निरक्षदेशसंस्थानामुभये क्षितिजाश्रये” सू०। “मेरोरुभयतो दक्षिणोत्तराग्रयोराकाशस्थिते ध्रुवतारे दक्षिणोत्तरे क्रमेण मध्याकाशमध्ये भवतः। निरक्षदेशसंस्थानां प्रागुक्तनगरस्थितमनुष्याणामुभये दक्षिणोत्तरे ध्रुवतारे क्षितिजाश्रये तद्भूगर्भक्षितिजवृत्तस्थे भवत इत्यर्थः।” रङ्गना०। अतएव तैष्यक्षांशाभावलम्बांशपरमत्वमिति वदन् मेरावक्षांशपरमत्वमित्याह “अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः। नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा” सू०। “तासूक्तनगरीषु। अत उभये क्षितिजाश्रये इति कारणात् अक्षोच्छ्रयो ध्रुवोच्चत्वं न। तथाच क्षितिजाद्ध्रुवोच्चत्वमक्षांशा इति तदभावात् तदभाव इति भावः। तुकारात् तन्नगरीषु ध्रुवयोः क्षितिजस्थयोः सतोर्लम्बांशा नवतिः शून्याक्षांशोननवतेर्लम्बांशत्वात्। खमध्याद्ध्रुवयोः क्षितिजस्य लम्बांशस्वरूपत्वाच्च मेरावक्षांशास्तथा नवतिः, ध्रुवस्य परमोच्चत्वात्। यथा निरक्षदेशेऽक्षांशाभावाल्लम्बांशाः परमास्तथा मेरावक्षांशपरमत्वाल्लम्बांशाभाव इत्यर्थसिद्धम्।” रङ्गनाथः।

“निरक्षदेशक्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ। तदाश्रितं खे जलयन्त्रवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि। उदग्दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमृक्षमण्डलम्। उदग् ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः। योजनसंख्याभांशैर्गुणिता स्वपरिधिहृता भवन्त्यंशाः। भूमौ कक्षायां वा भागेभ्यो योजनानि च व्यस्तम्। सौम्यं ध्रुवं मेरुगताः खमध्ये याम्यं च दैत्या निजमस्तकोर्द्ध्वे। सव्यापसव्यं भ्रमदृक्षचक्रं विलोकयन्ति क्षितिजप्रसक्तम्” सि० शि०। विष्णुवरेण उत्तानपादनृपपुत्रस्यैव तदधिष्ठातृत्वं तथाभूतपदलाभकथा च काशीख०

“विष्णुरुवाच “अयि! बाल! विशालाक्ष! ध्रुव! ध्रुवमतेऽनघ!। परिज्ञातो मया सम्यक् तव हृत्स्थो मनोरथः। अन्नाद् भवन्ति भूतानि वृष्टेरन्नसमुद्भवः। तद्वृष्टेः कारणं सूर्यः सूर्याधारो ध्रुवो विभो!। ज्योतिषचक्रस्य सर्वस्य ग्रहर्क्षादेः समन्ततः। गगने भ्रमतो नित्यं त्वमाधारो भविष्यसि। मेधीभूतः स वै सर्वान् वायुपाशैर्नियन्त्रितान्। आकल्पं तत्पदे तिष्ठन् भ्रामयन् ज्योतिषाङ्गणान्। आराध्य श्रीमहादेवं पुरा पदमिदं मया। आसादि यत्तदेतत्ते तपसा प्रतिपादितम्। केचिच्चतुर्युगं यावत् केचिन्मन्वन्तरं ध्रुव!। तिष्ठन्ति त्वन्तु वै कल्पं पदमेतत् प्रशास्यसि। मनुनापि न यत् प्राप्तं किमन्यैर्मानवैर्ध्रुव!। मत्पदं विहितं वत्स! शक्राद्यैरपि दुर्लभम्। अन्यान् वरान् प्रयच्छामि स्तवेनानेन तोषितः। सुनीतिरपि ते माता त्वत्समीपे भविष्यति” भाग० ५।२३ अ० शनिलोकपर्यन्तवर्णनान्ते

“अथ तस्मात् परतस्त्रयोदश लक्षयोजनान्तरतो यत्तद्विष्णोः